चित्रकथा

अभावः

अस्ति नास्तीति यो ब्रूते स्वं च नास्तीति मन्यते ।
तस्याभावोऽपि निःशेषं न भवेदिति किं वदेत् ॥

१
राजकीय संस्कृतमहाविद्यालयः
कालिदासः
२
मैत्रेय, आर्द्रकचायम् आनीतवान्। पिबतु भवान्।
स्थापयतु तत्रैव। पश्चात् पास्यामि।
३
चत्वारि वर्षाणि व्यतीतानि। भवान् अद्यापि एकाकी। कुक्कुरमपि न पालयति।
कुक्कुरः अपि सहवोढ्वा भवितुम् अर्हति किम्?
न जानामि सहवोढ्वः परिभाषाम्। किन्तु तव कक्षायाः शङ्करः प्रत्यागतः श्रूयते। सः सम्प्रति कुशलः अधिवक्ता। जानासि किम्?
४
अभावः न प्रमेयम्, यतः शून्यम्।
५
शङ्करः... सः तु वहुपुर्वं कक्षां त्यक्तवान्।
न त्यक्तवान्, भवता निष्कासितः। अभावं न स्वीकरोति स्म इति कृते। सत्यम् उत?
६
सः अभावं न स्वीकरोति स्म। अहं किं कर्तुं शक्नोमि?
स्वयं स्वीकरोति किम् भवान्? न्याये अभावः पठ्यते। जीवने?

१
अरे शङ्करः! भवान् अत्र?
नमो नमः। कार्यवशात् आगतः। किन्तु प्रथमं प्रणमामि— मम पुरातनं गुरुम्
२
शङ्कर। बहुदिनात् परम् अधिवक्ता सम्प्रति?
आम्। भवतः एव आशीर्वादेन।
३
अहं कक्षां प्रति गच्छामि। युवयोः वहूनि वार्तालापानि स्यु।
४
भवता ज्ञातं किम्? मम विवाहः विच्छिन्नः।
श्रुतवान्। दुःखितोऽस्मि।
किमर्थं दुःखितः? अभावः तु प्रमेयः एव। भवान् एव पाठितवान्।
५
मम पत्नी गता। सः प्रध्वंसाभावः। भवतः पत्नी गता। सः अपि प्रध्वंसाभावः एव खलु?
आम्।
तर्हि भवतः अहं च समानौ। आवयोः जीवने समानः एव अभावः
६
किन्तु भवान् तु अन्यत् वदति। भवान् कथयति— मम जीवने तु अत्यन्ताभावः। सहवोढ्वा कदापि नासीत्।
एतत् किं सत्यम्? उत भवान् आत्मानं वञ्चयति?
त्वं न्यायं न जानासि, शङ्करः। तेनैव पुरा कक्षां त्यक्तवान्। अद्यापि न जानासि।

१
सम्यकू। न जानामि न्यायम्। किन्तु अधिवक्ता अस्मि। प्रमाणं जानामि।
२
भवतः पत्नी बसुन्धरा— सा मरणात् पूर्वं मम मातुः समीपे गतवती मम माता तस्याः सखी आसीत्।
३
सा उकवती— “मैत्रेयः मां प्रेम्णा न अपश्यत्। सः केवलं स्वपुस्तकेषु जीवति। अहं तस्य जीवने आसं, किन्तु सः मम जीवने न आसीत्।”
४
भवान् कथयति— सहबोद्धा कदापि नासीत्। किन्तु सा तु आसीत्। भवान् तस्याः सहबोद्धा न अभवत्।
इदं न अत्यन्ताभावः। इदं तु भवतः कृते— प्रध्वंसाभावः एव।
त्वं किं जानासि? त्वं किमपि न जानासि।
अहं एतावदेव जानामि— भवान् स्वस्य दोषं न स्वीकरोति। अत्यन्ताभावः भवतः रक्षाकवचः अस्ति। येन भवान् दोषात् पलायते।
६

१
यदि अहं दोषी, तर्हि का क्षतिः ? अभावः तु अभावः एव । प्रध्वंसाभावः वा अत्यन्ताभावः वा — उभयत्र परिणामः शून्यम् ।
२
नहि । महान् भेदः अस्ति ।
प्रध्वंसाभावे स्मृतिः अवशिष्टा भवति । उत्तरदायित्वं च । अत्यन्ताभावे तु — किमपि न । शून्यम् ।
३
भवान् स्मृतिम् अपि लोपितुम् इच्छति । उत्तरदायित्वम् अपि । तेन एव भवान् अत्यन्ताभवम् रचितवान् । मिथ्याज्ञानम् । माया न, निश्चितम् मिथ्याज्ञानम् इदम्।
४
५
सा... सा किं कथितवती ? अन्तिमदिने ?
६
इदं लिखितवती सा । भवतः कृते न । स्वस्य कृते ।
प्रेमणा जानामि यं नाथं स मां न ज्ञातवान् प्रिये। इत्येकाकिन्यहं तेन जीवामि च प्रिये सदा॥

१
कर्मचारिणां कक्षः
यदहं प्रमाणम् अमन्ये, तदेव मिथ्याज्ञानम् आसीत्।
२
सूचना-पटलम्
संस्कृतवाद-वितर्कः प्रतियोगिता २०१९
अवकाश-सूची (२०२०)
अभावः — एका चर्चा
श्रद्धाञ्जलिः आचार्यः श्री .... स्वर्गवासनागतः २०१६
३
भवान् पृष्टवान्— प्रध्वंसाभावे उत्तरदायित्वं भवति वा?
उत्तरम् — आम्, भवति। यः प्रेम न दत्तवान्, तस्य उत्तरदायित्वं शाश्वतम्।
४
किं करोमि इदानीम्? सा तु नास्ति।
सत्यं स्वीकरोतु। "मम जीवने सहबोद्धा नासीत्" — इदं न सत्यम्। सत्यम् इदम् — "सहबोद्धा आसीत्, किन्तु अहं तां न ज्ञातवान्।"
५
६
तर्हि अहं केवलं प्रध्वंसाभावः अस्मि। न अत्यन्तः।
आम्। भवान् रिक्तः नासीत्। भवान् रिक्तः कृतः। स्वेन एव।

१
प्रमाणौः अर्थपरीक्षणं न्यायः । किन्तु प्रमाणानि अपि मिथ्या भवितुम् अर्हन्त्ति ।
२
त्वं आसीः । अहं न आसम् ।
३
४
चायं शीतलं जातम् ।
सर्व शीतलं जातम् ।
५
सा सुन्दरी आसीत् । चतुरा च । सर्वे जानन्त्ति स्म — सा भवन्तं प्रेम्णा जानाति स्म् ।
अहं न जानामि स्म् । इदानीं जानामि ।
६

१
अभावस्य चत्वारः प्रकाराः
१. प्रागभावः
२. प्रध्वंसाभावः
३. अन्योन्याभावः
४. अत्यन्ताभावः
प्रमाणैः अर्थपरीक्षणं न्यायः।
किन्तु प्रमाणानि अपि मिथ्या भवितुम् अर्हन्ति।
२
अभावस्य चत्वारः प्रकाराः
१. प्रागभावः
२. प्रध्वंसाभावः
३. अन्योन्याभावः
४. ~~अत्यन्ताभावः~~ अहं प्रध्वंसाभावः।
आसं, नास्मि।
३
अभावस्य चत्वारः प्रकाराः
१. प्रागभावः
२. प्रध्वंसाभावः
३. अन्योन्याभावः
४. ~~अत्यन्ताभावः~~ अहं प्रध्वंसाभावः।
आसं, नास्मि।
४
आगच्छतु। एका चर्चा शेषा अस्ति।
का?
अभावेऽपि प्रेम अवशिष्टम् भवति वा?
५
संस्कृत विभाग
प्राच्यविद्या भवनम्
यत्र सहबोद्धा अस्ति, तत्र अत्यन्ताभावः न भवति।
६
चायम्
अभावः प्रमितो येन प्रमाणं तेन खण्डितम्।
प्रमाता केवलः पश्चादवशिष्टः प्रधावति ॥